सच्छीलं विषयसुखान्वितं प्रभुं ख्यातियुक्तमनफायाम्।
सुनफायां धीधनकीर्तियुक्तमात्मार्जितैश्वर्यम् ॥२॥
बहुभृत्यकुटुम्बारम्भं सुखभोगान्वितं च दौर्धरिके।
भृतकं दुखितमधनं जातं केमद्रुमे विद्यात् ॥ ३ ॥

सं०—अनफायां=अनफायोगे सच्छीलं=शोभनस्वभावोपेतं, विषयसुखान्वितं=व्यावहारिकसर्वसुखोपेतं प्रभुं=समर्थं, ख्यातियुक्तं=कीर्तियुक्तं, स्यात्। सुनफायां=सुनफायोगे, जातं=उत्पन्नं, धीधनकीर्तियुक्तं=बुद्धिधनप्रख्यातियुक्तं, आत्मार्जितैश्वर्यम्=स्वोपार्जितविभवं, भवति। दौर्धरिके=दुरुधरायोगे, बहुभृत्यकुटुम्बारम्भं=विविधभृत्यकुटुम्बकार्यारम्भयुक्तं, सुखभोगान्वितं=सुखविलासोपेतं, च भवति। केमद्रुमे=केमद्रुमयोगे, जातं, भृतकं=भृत्यकर्मकरं, दुःखितं=दुःखान्वितं, अधनं=धनरहितं, च विद्यात्=जानीयात् ॥ २-३ ॥

हि०—अनफा योग में जातक सुन्दर स्वभाव वाला सभी तरह के सुख से युक्त, पराक्रमवान् और यशस्वी होता है। सुनफा योग में जातक बुद्धिमान् धनवान्, यशस्वी, तथा अपने पराक्रम से ऐश्वर्यवान् होता है।

दुरुधरा योग में अनेक भृत्यों एवं कुटुम्बों से युक्त अनेक शुभकार्य आरम्भ करनेवाला और सुखी होता है। केमद्रुम योग में सामान्य भृत्यकर्म से आजीविका चलानेवाला, दुःखी और धनहीन होता है ॥ २-३ ॥

वि०—जातक पारिजात में केमद्रुम योग का भेद निम्न है—

१—गुरु दृष्टि रहित चन्द्र लग्न या सप्तम में हो और अष्टकवर्ग के विचार से ४ बिन्दु से युत हो तो केमद्रुम होता है।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

२—नीचस्थग्रह से दृष्ट पापग्रह के नवांशस्थ चन्द्र रवि के साथ हो।

३—पापदृष्ट या युत क्षीण चन्द्र अष्टम में हो तथा रात्रि का जन्म हो।

४—पापग्रह पीड़ित पापदृष्ट चन्द्र हो।

५—लग्न या चन्द्र से १।४।७।१० स्थानों में पापग्रह हों।

६—जन्म लग्न पापयुत दृष्ट हो और निर्बल शुभ चन्द्र हो।

७—नीच या शत्रुगृहस्थ ग्रह से दृष्ट शत्रुवर्गस्थ चन्द्र तुला में हो।

८—नीच या शत्रुघर के चन्द्र १।४।७।१०।५।९ में हो और चन्द्र से ६।८।१२ में गुरु हो।

९—पाप चर राशि के नवांशस्थ चन्द्र चर राशि में हो और शत्रु ग्रह से दृष्ट हो गुरु की दृष्टि न हो तब प्रबल केमद्रुम होता है।

१०—नीच, शत्रु एवं पाप ग्रह के वर्ग में शनि शुक्र होकर एक राशि में हो या परस्पर दृष्ट हो।

११—पाप ग्रह की राशि एवं नवांश में निर्बल चन्द्र पाप ग्रह के साथ हो और उसे दशमेश देखता हो तथा रात्रि का जन्म हो।

१२—नीच राशि के नवांशस्थ चन्द्र पाप युत हो और उसे नवमेश देखता हो।

१३—रात्रि का जन्म हो और क्षीणचन्द्र नीचस्थ हो।

नोट—ये योग धनहीन कारक हैं। इनका परिहार पहले कहा गया है। अतः अतः तदनुसार फलादेश करना चाहिये।

अनफादियोग कारक ग्रहाणां फलानि—

भौमः शूरश्चण्डो महाधनो ज्ञानवान् बुधो निपुणः।
ऋद्धः शुक्रः सुखितो गुरुर्गुणाढ्यो नृपतिपूज्यः॥ ४॥

बह्वारम्भः सौरिर्बहुभृत्यः पूजितो गुणैर्विद्धः।
एषां गुणैः समगुणा ज्ञेया योगोद्भवाः पुरुषाः॥ ५॥

सं०—पूर्वोक्त अनफादियोगे यदि भौमः=मङ्गलः, योगकारकः स्यात्तदा जातकः शूरः वीरः, चण्डः=तीक्ष्णः, च भवति। बुधश्चेत्तदा महाधनः, ज्ञानवान्, निपुणश्च भवति। शुक्रश्चेत्तदा ऋद्धः=समृद्धिवान्, सुखिनश्च भवति। गुरुश्चेत्तदा गुणाढ्यः=गुणसम्पन्नः, नृपतिपूज्यश्च। सौरिः=शनिः, चेत्तदा बह्वारम्भः, बहुकार्यारम्भी, बहुभृत्यः, पूजितः=सम्मानितः, गुणैर्विद्धः=अनेकगुणोपेतः, च भवति। एषां ग्रहाणां, गुणैः समगुणाः=तुल्यगुणाः, योगोद्भवाः=अनफादियोगोत्पन्नाः, पुरुषाः=नराः, ज्ञेया=ज्ञातव्या॥ ४-५॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

हि०—पूर्व कथित अनफादि योग कारक यदि मङ्गल हो तो जातक शूर और तेज होता है। बुध होने से धनी, ज्ञानी और चतुर हो। शुक्र होने में धनी और सुखी हो। गुरु हो तो गुणवान् और नृपपूज्य हो। शनि हो तो अनेक कार्यारम्भ करनेवाला, अनेक सेवक से युक्त, सम्मानित और अनेक गुणों से युक्त हो। इन ग्रहों के गुण के तुल्य उक्त योगोत्पन्न जातक में गुण समझना चाहिये ॥ ४-५ ॥

नोट—मानसागरी आदि में मंगल का फल चौर कहा गया है अतः भट्टोत्पली टीका में 'भौमश्चौरश्चण्डो' यह लिखना सङ्गत है।

विशेष—

अनफा योगकारक ग्रह फल—

कु० फ०—चौरः स्वामी दृप्तः स्ववशी मानी रणोत्कटः सेर्ष्यः।
क्रोधात्संपत्साध्यः सुतनुः कुजोऽनफायां प्रगल्भश्च ॥

बु० फ०—गन्धर्वो लेख्यपटुः कविः प्रवक्ता नृपाप्तसत्कारः।
रुचिरः सुभगोऽनफायां प्रसिद्धकर्मा विबुधश्च भवेत् ॥

गु० फ०—गम्भीरः सन्मेधा चानुयुतो बुद्धिमान् नृपाप्तयशाः।
अनफायां त्रिदशगुरौ संजातः सत्कविर्भवति ॥

शु० फ०—युवतीनामतिसुभगः प्रणयः क्षितिपस्य गोपतिः कान्तः।
कनकसमृद्धश्च पुमान् अनफायां भार्गवे भवति ॥

श० फ०—विस्तीर्णभुजः सुभगो गृहीतवाक्यश्चतुष्पदसमृद्धः।
दुर्वनितागणभोक्ता गुणसहितः पुत्रवान् रविजे ॥

सुनफायोग कारक फल—

मं० फ०—विक्रमवित्तप्रायो निष्ठुरवचनश्च नायकस्तीक्ष्णः।
हिंस्रो नित्यविरोधी सुनफायां भौमसंयोगे ॥

बु० फ०—श्रुतिशास्त्रगेयकुशलो धर्मरतः काव्यकृन्मनस्वी च।
सर्वहितो रुधिरतनुः सुनफायां सोमजे भवति ॥

गु० फ०—नानाविद्याचार्यः ख्यातिं नृपतिं वृषप्रियं चापि।
सकुटुम्बधनसमृद्धं सुनफायां सुरगुरुः कुरुते ॥

शु० फ०—स्त्रीक्षेत्रगृहपश्चतुष्पदाढ्यः सुविक्रमो भवति।
नृपसत्कृतः सुवेषो दक्षः शुक्रेण सुनफायाम् ॥

श० फ०—निपुणमतिर्ग्रामपुरैर्नित्यं संपूजितो धनसमृद्धः।
सुनफायां रवितनये क्रियासुगुप्तो भवेन्मलिनः ॥

दुरुधरायोगकारक फल—

मं० बु० फ०—अनृतको बहुवित्तो निपुणोऽतिशठो गुणाधिको लुब्धः।
वृद्धस्त्रीप्रसक्तः कुलाग्रणीः शशिनि भौमबुधमध्ये ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

मं० गु० फ०—ख्यातः कर्मसु कितवो बहुधनवैरस्त्वमर्षणो धृष्टः ।
आरक्षकः कुजगुर्वोर्मध्यगते शशिनि संग्राही ॥
मं० शु० फ०—उत्तमरामासुभगो विषादशीलोऽस्त्रविद्धूवेच्छूरः ।
व्यायामी रणशीलः सितारयोर्मध्यगे चन्द्रे ॥
मं० श० फ०—उत्तमसुरतो बहुसंचयकारको व्यसनसक्तः ।
क्रोधी पिशुनो रिपुमान् यमारयोः स्याद्दुरुधरायाम् ॥
बु० गु० फ०—धर्मरतः शास्त्रज्ञो वाक्पटुः सर्ववर्द्धनः समृद्धः ।
त्यागयुतो विख्यातो गुरुबुधमध्यस्थिते चन्द्रे ॥
बु० शु० फ०—प्रियवाक् सुभगः कान्तः प्रवृत्तगो यदि सुकृतवान् नृपतिः ।
सौख्यः शूरो मंत्री बुधसितयोर्मध्यगे हिमकिरणे ॥
बु० श० फ०—देशे देशे गच्छति वित्तवशो नास्ति विद्यया सहितः ।
चन्द्रेऽन्येषां पूज्यः स्वजनविरोधी ज्ञमन्दयोर्मध्ये ॥
बृ० शु० फ०—धृतिमेधः स्थैर्ययुतो नीतिज्ञः कनकरत्नपरिपूर्णः ।
ख्यातो नृपकृत्यकरो गुरुसितयोर्दुरुधरायोगे ॥
बृ० श० फ०—सुखनयविज्ञानप्रदः प्रियवाक् विद्वान् धुरंधरो मर्त्यः ।
ससुतो धनी सुरूपश्चन्द्रो गुरुशनिमध्यो भवेज्जातः ॥
शु० श० फ०—वृद्धवनितः कुलाढ्यो निपुणः स्त्रीवल्लभो धनसमृद्धः ।
नृपसत्कृतं बहुज्ञं कुरुते चन्द्रः शनिसितयोः ॥

वेशियोगः—

सूर्याद्द्वितीयमृक्षं वेशिस्थानं प्रकीर्तितं यवनैः ।
तच्चेष्टग्रहयुक्तं जन्मनि चेष्टासु च विलग्नम् ॥ ६ ॥

सं०—स्पष्टम् । चेष्टासु=यात्रासु ।

हि०—जातक की जन्मकुण्डली में रवि से द्वितीय राशि वेशिस्थान है, यह यवनाचार्यों ने कहा है । उसमें शुभ ग्रह होने से शुभफल अन्यथा अशुभफल होता है । यात्रा के समय में भी तात्कालिक कुण्डली के अनुसार वेशियोग का विचार करना चाहिए । शुभग्रह के सम्बन्ध से शुभदा यात्रा होती है ॥ ६ ॥

विशेष—मानसागरी में वोशि और वेशियोग रवि के द्वादश और द्वितीय स्थानक्रम से कहा गया है । अर्थात् रवि से १२ में ग्रह हो तो वेशि, २ में हो तो वेशि और दोनों में होने से उभयचरी योग होता है । यहाँ चन्द्रवर्जित कुजादिग्रहों की स्थिति से योग जानना चाहिए ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वेशियोगफलम्—

रवि से द्वितीय में गुरु हो तो जातक बुद्धिमान्, सात्त्विक, सत्यवक्ता, शूर और तार्किक होता है। शुक्र हो तो कलाविद्, रसज्ञ, चतुर, नीतिज्ञ, गुणवान्, चिकित्सिक, एवं पराक्रमी होता है। बुध हो तो मधुरभाषी, कोमल, विद्वान्, सुन्दर, नायक, और सङ्गीतप्रिय होता है। मंगल हो तो हिंसक, शूर, कलहप्रेमी, द्वेषी, बली और विजयी होता है। शनि हो तो धूर्त, अपना कार्यसाधक, व्यापारदक्ष, गुरुद्वेषी, और उदर-रोगी होता है।

वेशियोगफलम्—

रवि से १२ में गुरु हो तो जातक संचयी, सद्व्ययी, विचारक, कार्यदक्ष और विनम्र होता है। शुक्र हो तो कायर, व्ययी, कामी, मेधावी, परवशी और लज्जालु होता है।

बुध हो तो विनीत, कुसङ्गति से व्ययकारक, मृदु, कलाप्रिय, तर्क करने वाला, अभावी और बुद्धिमान् होता है।

मंगल हो तो पराक्रमी, परोपकारी, नेता, मातृसुखरहित, जनप्रिय और तमोगुणी होता है। शनि से कृपण, वातरोगी, आजीविक, कार्यदक्ष और निन्दक होता है।

उभयचरीयोगफलम्—

सूर्य से २।१२ में ग्रह हो तो जातक सुन्दर, समशरीर, निपुण, बली, विद्वान्, धनी, अनेक बन्धुवान्धवभृत्य आदि से युत, उत्साही, भोगी, भाग्यशाली, राजतुल्य, उत्तम-जीविका एवं प्रतिष्ठा से युक्त होता है।

द्विग्रहयोगफलम्—

यन्त्रज्ञं पापरतं निपुणं क्रूरं च शस्त्रवृत्तिं च।
धातुज्ञं च क्रमशश्चन्द्रादिभिरन्वितः सूर्यः॥ ७॥

सं०—स्पष्टम्।

हि०—रवि चन्द्र के योग जातक विविधयन्त्रों का विशेषज्ञ इंजनियर आदि हो। मंगल रवि के योग में पापकर्म करनेवाला, बुध रवि के योग में निपुण, गुरु रवि के योग में उग्रस्वभाववाला, शुक्र रवि के योग में शस्त्रवृत्ति अर्थात् अस्त्रशस्त्रादि से जीविका चलाने वाला, और शनि रवि के योग में धातुज्ञ अर्थात्, सोना, चाँदी, हीरा आदि धातुओं के व्यापार आदि कार्य में निपुण हो॥ ७॥

योगान्तरम्—

चन्द्रोऽङ्गारकपूर्वैः कूटज्ञं प्रश्नितं कुलाभ्यधिकम्।
वस्त्रव्यवहारज्ञं क्रमेण पौनर्भवं चापि॥ ८॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सं०—स्पष्टम्। कूटज्ञः=मायाविद्, पौनर्भवः=विधवा प्रभवः। प्रश्नुतं=वाक्यनिपुणं।

हि०—चन्द्र मंगल के योग में जातक मायावी, चन्द्रबुध के योग में सुवक्ता, चन्द्र गुरु के योग में कुलश्रेष्ठ, चन्द्र शुक्र के योग में वस्त्र व्यवहार कुशल, और चन्द्र शनि के योग में विधवापुत्र होता है ॥ ८ ॥

अन्ययोगौ—

मल्लो रक्षोऽन्यस्त्रीसक्तो दुःखान्वितः कुजो ज्ञाद्यैः।
ज्ञौ जीवाद्यैर्गीतज्ञं वाग्मिनं महेन्द्रजालज्ञम् ॥ ९ ॥

सं०—स्पष्टम्।

हि०—मंगल बुध के योग में जातक मल्ल अर्थात् युद्धविद्या में प्रवीण, मंगल-गुरु के योग में दूसरों का रक्षक, मंगल शुक्र के योग में परदारासक्त, मंगल शनि के योग में दुःखी होता है। बुध गुरु के साथ हो तो सङ्गीतविद्याप्रिय, शुक्र के साथ हो तो सुवक्ता और शनि से युत हो तो इन्द्रजालज्ञ होता है ॥ ९ ॥

अन्यः—

जीवः सितेन बहुगुणमसितेन समन्वितोऽत्र घटकारम्।
स्त्रीस्वं मन्देन सितस्त्रिभिरप्येवं फलानि वदेत् ॥१०॥

सं०—जीवः=गुरुः, सितेन=शुक्रेण, युतस्तदा जातं बहुगुणं=अनेकगुणयुक्तं, करोति। अत्र=इह, असितेन=शनिना, समन्वितः=युक्तस्तदा, घटकारम्=कुम्भकारं, करोति। सितः=शुक्रः, मन्देन=शनिना, युक्तस्तदा स्त्रीस्वं=स्त्रीधनं, करोति। एवं=अमुना प्रकारेण त्रिभिरपि=त्रिग्रहयोगवशेनापि, फलानि वदेदिति ॥ १० ॥

हि०—गुरु यदि शुक्र के साथ हो तो जातक अनेक गुणों से युक्त होता है और शनि के साथ हो तो कुम्भकार अर्थात् बरतन बनानेवाला व्यापारी हो। शुक्र के साथ शनि हो तो जातक को स्त्रीधन प्राप्त होता है। इसी तरह तीन ग्रहों के योग से भी शुभाशुभफलादेश करना चाहिए ॥ १० ॥

विशेष—त्रिग्रह आदि के योगफल मानसागरी आदि में लिखा है। यहाँ जो द्विग्रहयोगफल कहा गया है उसके आधार पर भी त्रिग्रह आदि के योगफल भी ज्ञात होंगे। जैसे मान लिया कि किसी की जन्म कुण्डली में चन्द्र, मंगल और गुरु एक राशि में है तो चन्द्र-मंगल योग एवं चन्द्र-गुरु तथा गुरु-मंगल का योग फल जो हो, वह त्रिग्रह-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

योग फल होगा। इसी तरह चार आदि ग्रहों का योगफल जानना चाहिए। सूक्ष्म विचार के लिए केन्द्रेश त्रिकोणेश आदि के योग में उत्तम फल और ३।६।११।८।१२ इन स्थानों के अधिपति ग्रहों के योग में अशुभफल ज्ञातव्य है। लग्नेश और तृतीयेश के योग में पराक्रमवृद्धि, लग्नेश धनेश या लाभेश के योग में धनलाभ, लग्नेश षष्ठेश का योग रिपु और रोगकारक, व्ययेश का योग व्ययकारक, और अष्टमेश का योग निधनकारक होता है, इसी तरह लग्नेश और अन्यभावेश का सम्बन्ध विचार कर शुभाशुभ फलादेश करना चाहिए।

प्रव्रज्यायोगः—

चतुरादिभिरेकस्थैः प्रव्रज्यां स्वां ग्रहः करोति बली।
बहुवीर्यैस्तावत्यः प्रथमा वीर्याधिकस्यैव ॥ ११ ॥

सं०—एकस्थैः=एकराशिगतैः, चतुरादिभिर्ग्रहैः, प्रव्रज्यायोगो भवति। तेषां ग्रहाणां मध्ये बली ग्रहः यः स स्वां प्रव्रज्यां करोति। बहुवीर्यैः=अनेकैर्बलिभिर्ग्रहैः, तावत्यः=बलीग्रहसंख्यकाः, प्रव्रज्याः भवन्ति। तासु प्रव्रज्यासु, वीर्याधिकस्य=बलाधिकस्य ग्रहस्य, एव, प्रथमा=आद्या, प्रव्रज्या भवति। ततोबलक्रमेण प्रव्रज्या वेदितव्या। बलीग्रहाभावे प्रव्रज्या योगाभावो ज्ञेयः ॥११॥

हि०—जिसकी जन्मकुण्डली में एक जगह चार आदि ग्रह हों तो उसे प्रव्रज्या (सन्यास) योग होता है। उन ग्रहों में जो सर्वाधिक बलवान् ग्रह हो, वह अपनी वक्ष्यमाण प्रव्रज्या का कारक होता है। एक राशिस्थित ग्रहों में जितने ग्रह बली हों, उतनी प्रव्रज्याएँ होती हैं। उनमें सर्वाधिक बली ग्रह की प्रव्रज्या पहले होती है, उसके बाद बल के अनुसार क्रम से ग्रहों की प्रव्रज्या होती है। योग में बलवान् ग्रह न होने पर प्रव्रज्या योग नहीं होता ॥११॥

ग्रहाणां प्रव्रज्याज्ञानम्—

तापसवृद्धश्रावकरक्तवटाजीविभिक्षुचरकाणाम्।
निर्ग्रन्थानां चार्कात् पराजितैः प्रच्युतिर्बलिभिः ॥ १२ ॥

सं०—अर्कात्=सूर्यादारभ्य, क्रमेण तापसवृद्धश्रावकादयः प्रव्रज्या भवन्ति। अर्थात् सूर्ये, तापसः=वानप्रस्थः, चन्द्रे, वृद्धभावकः=कापालिकः, कुजे, रक्तपटः=शाक्यः (सन्यासी), बुधे, आजीवि=एकदण्डी, गुरौ, भिक्षुः=त्रिदण्डी (यतिः), शुक्रे, चरकः=चक्रधरः, शनौ, निर्ग्रन्थः=नागः क्षपणकः, च जातको भवति। बलिभिः=बलयुक्तैर्ग्रहैः, पराजितैः=विजितैः, प्रच्युतिः=प्रव्रज्याहीना, ज्ञेया ॥१२॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

हि०—प्रव्रज्या योग में सूर्य बली होने से जातक वानप्रस्थ, चन्द्र से कापालिक, मंगल से सन्यासी, बुध से एकदण्डी (भिक्षु बौद्ध), गुरु से भिक्षु (त्रिदण्डी), शुक्र से चरक याने चक्रधर और शनि से नग्न (नागा या जैन) होता है। बली ग्रहों से पराजित ग्रह की प्रव्रज्या नहीं होती। एकराशिस्थ दो ग्रहों के अंशादि तुल्य होने पर युद्ध होता है, उसमें उत्तर दिशा में रहने वाला ग्रह विजयी और दक्षिणस्थ ग्रह पराजित होता है। दिशा का ज्ञान शर से होता है ॥१२॥

प्रव्रज्यायोगे विशेषः—

दिनकरलुप्तमयूखैरदीक्षिता भक्तिवादिनस्तेषाम् ।
याचितदीक्षा बलिभिः पराजितैरन्यदृष्टैर्वा ॥ १३ ॥

सं०—दिनकरलुप्तमयूखैः=अस्तंगतैर्ग्रहैः, अदीक्षिताः=दीक्षा-रहिताः, भवन्ति, किन्तु तेषां=प्रव्रजितानां, भक्तिवादिनः=भक्ताः भवन्ति। बलिभिः=बलयुक्तैः, पराजितैः=विजितैः, वा अन्यदृष्टैः=भिन्नग्रहावलोकितैः, याचितदीक्षाः=दीक्षाप्रार्थनापराः, भवन्ति ॥१३॥

हि०—प्रव्रज्याकारक ग्रह यदि सूर्य के साथ अस्त हो तो जातक अदीक्षित रहता है, परन्तु परिव्राजक का भक्त होता है। यदि योगकारक ग्रह बली ग्रह से पराजित हो अथवा दूसरे ग्रहों से दृष्ट हो, तब जातक दीक्षा का याचक होता है—अर्थात् दीक्षित नहीं होता ॥१३॥

वि०—१२।१७।१३।११।९।१५ ये अंश क्रम से चन्द्रादि ग्रहों के कलांश हैं। रवि से अपने अपने कलांश के भीतर ग्रह रहने से अस्त होते हैं। जैसे रवि से १ अंश के भीतर चन्द्र होने से अस्त होता है। इसी तरह अन्य ग्रहों का जाने।

अन्य प्रव्रज्यायोग—

१. ग्रहदृष्टिरहित जन्मराशीश यदि शनि को देखें तो प्रव्रज्या हो।
२. निर्बल जन्मराशीश को शनि देखता हो।
३. चन्द्रमा मंगल के द्रेष्काण में या शनि-मंगल के नवांश में हो।
४. शनि के द्रेष्काण में चन्द्र हो या शनि-मंगल के नवांश में गया चन्द्र केवल शनि से दृष्ट हो तो जातक सन्यासी हो।
५. लग्नेश और शनि निर्बल हो तो सन्यासी हो।
६. यदि शनि से दृष्ट चन्द्र, गुरु और लग्न हो तथा जन्मलग्न से नवम में गुरु हो तो जातक आचार्य पदधारी तपस्वी होता है।
७. पारिजातांश में गुरु, सिंहासनांश में चन्द्र और ऐरावतांश में शुक्र हो।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

८. कारकांशलग्न से द्वादश में केतु हो।
९. कारकांशलग्न से १२ में मेष या धनु राशि के शुभ ग्रह हों।
१०. चार ग्रहों का योग जिस राशि में हो उसका स्वामी केन्द्र या त्रिकोण में हो।
११. जन्मलग्न से दशम मीन राशि का बुध या मंगल हो।
१२. निद्रावस्था के अष्टमेश चतुर्थ में हो या शुभयुत दृष्ट हो।
१३. लग्न, अष्टम और धर्मभाव अपने अपने स्वामी से दृष्ट हो।
१४. लग्न से नवम में दो तीन शुभ ग्रह हों।

इति प्रव्रज्यायोगविचारः।

—०—

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथ राशिशीलनिरूपणम्

चरादि संज्ञक राशीनां फलानि—

अस्थिरविभूतिमित्रं चलनमटनं स्खलितनियममपि चरभे ।
स्थिरभे तद्विपरीतं क्षमान्वितं दीर्घसूत्रं च ॥ १ ॥
द्विशरीरे त्यागयुतं कृतज्ञमुत्साहितं विविधचेष्टम् ॥ [1] ॥
ग्राम्यारण्यजलोद्भवराशिषु विद्याच्च तच्छीलान् ॥ २ ॥

सं०—चरभे = चरसंज्ञकराशौ, अस्थिरविभूतिमित्रं = अनियतैश्वर्य-सुहृदुपेतं, चलनं=चञ्चलं, अटनं=भ्रमणशीलं, स्खलितनियमम् = च्युतव्रतं, अपि=निश्चयेन, जातको भवति । स्थिरभे=स्थिरराशौ तद्विपरीतं=चरराश्युक्तं विपरीतं, क्षमान्वितं=क्षमायुक्तं, दीर्घसूत्रं=दीर्घकालेन कार्यसम्पादकः, च भवति । द्विशरीरे=द्विस्वभावराशौ, त्यागयुतं=दातारं, कृतज्ञं=उपकारमन्तारं, उत्साहितं=उत्थानशीलं, विविधचेष्टम्=बहुविधकार्यकरणशीलं, भवति । ग्राम्यारण्यजलोद्भवराशिषु = द्विपदवनचरजलचरसंज्ञकभेषु, तच्छीलान् = तत्तद्राशिप्रयुक्तस्वभावान्, च, विद्यात्=जानीयात् ॥ १-२ ॥

हि०—चर संज्ञक (१।४।७।१०) राशि में जन्म लेनेवाला जातक अस्थिर सम्पत्तिवाला, चञ्चल मित्र एवं स्वभाववाला, व्यर्थ भ्रमणशील और अनियतव्रतवाला होता है । स्थिर संज्ञक (२।५।८।११) राशि में स्थिर सम्पत्ति, स्थिर मित्र, स्थिर स्वभाव, अभ्रमणशील, दयालु और दीर्घसूत्री होता है। द्विस्वभाव संज्ञक (३।६।९।१२) राशि में दाता, कृतज्ञ, उत्साही और अनेक कार्य करने वाला जातक होता है । द्विपद संज्ञक ग्राम्य (मिथुन, कन्या, तुला, कुम्भ, धनु का पूर्वार्द्ध) राशि में उत्पन्न जातक ग्राम्यप्रिय, अरण्य-वनचर (मेष, वृष, सिंह, धनु परार्द्ध, मकर पूर्वार्द्ध) राशि में उत्पन्न जातक अरण्यप्रिय अ र जलचर (कर्क मीन, मकर का उत्तरार्द्ध) राशि का जातक जलप्रिय होता है । वृश्चिक राशि का जातक ग्राम्य और अरण्य दोनों का प्रिय होता है ॥ १-२ ॥

विशेष—मेषादि राशिस्थ चन्द्र का फल निम्नलिखित है—

मेष राशिस्थ चन्द्रफलम्—

धनवान् पुत्रवान् उग्रः परोपकरणे रतः ।
सर्वकर्मसमायुक्तः सुशीलो राजवल्लभः ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

गुणाभिरामः सततं देवब्राह्मणपूजकः ।
कोष्ण शाकाल्पभोक्ता च ताम्रविस्तृत लोचनः ॥
शूरः शीघ्रप्रमादी च कामी दुर्बलजानुकः ।
शिरोव्रणयुतो दाता कुनखी सेवकप्रियः ॥
द्विभार्यः सङ्गरे भीरुश्चपलो नितरां भवेत् ।
प्रथमे सप्तमे वर्षे त्रयोदशमिते ज्वरः ॥
षोडशे वा सप्तदशे वर्षे स्यात्तु विसूचिका ।
तृतीये द्वादशे वापि जलाद्भीतिः प्रजायते ॥
पञ्चविंशन्मिते वर्षे सन्तानं च निशान्धता ।
द्वात्रिंशत्प्रमिते वर्षे शस्त्रघातः प्रजायते ॥
कार्यारम्भ प्रलापी च विदेशगमने रतः ।
कृशांगः शीघ्रगो मानी शुभलक्षणसंयुतः ॥
वाताधिकयः शुभैर्दृष्टे चन्द्रेनवति सम्मिते ।
आयुस्तस्य विनिर्देश्यं कार्तिकस्य सितेतरे ॥
पक्षेबुधे नवम्यां च निशीथे च शिरोरुजा ।
निधनं जायते नूनं जन्मनीन्दावजस्थिते ॥

वृष राशि फलम्—

अल्पतेजः नरः स्तब्धः कर्मबुद्धिविवर्जितः ।
सत्यवागर्थवान्कामी कामिनीवचनानुगः ॥
चिरायुरल्पकेशश्च परोपकरणेरतः ।
पितुर्मातुर्गुरूणां च भक्तो भूपतिवल्लभः ॥
सभायां चतुरो नित्यं सन्तुष्टो येनकेनचित् ।
पीडास्यात्प्रथमे वर्षे तृतीयेऽग्निभयं दिशेत् ॥
विसूचिकाभयं विद्यात्सप्तमे नवमे व्यथा ।
दशमे रुधिरोद्गारो द्वादशे पतनं तरोः ॥
सर्पाच्च षोडशे भीतिः पीडा चैकोनविंशके ।
पञ्चविंशन्मिते तोयाद्भयं भवति निश्चितम् ॥
त्रिंशन्मिते तथा पीडा द्वात्रिंशत्प्रमितेऽपि च ।
श्लेष्मलः शान्तिमान्छूरः सहिष्णुर्बुद्धिमान्नरः ॥
सौम्यग्रहेक्षिते चन्द्रे षण्णवत्यब्दसंख्यया ।
आयुर्जन्तोर्विनिर्देश्यमवश्यं बचनात्सताम् ॥
माघमासे नवम्यां च शुक्ले पक्षे भृगोर्दिने ।
रोहिण्यां निधनं विद्याज्जन्मनीन्दौ वृषस्थिते ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

मिथुन राशिफलम्—

ग्रामण्यां चतुरः प्राज्ञो दृढ़सौहृदकारकः।
मिष्टान्नाशी सुशीलश्च छिन्नवाक् चललोचनः॥
कुटुम्बवत्सलः कामी कुतूहलरतिप्रियः।
वयसः पूर्वभागेतु सुखी मध्येतु मध्यमः॥
चरमेऽतितरां दुखी द्विभार्यो गुरुवत्सलः।
स्वल्यापत्यो गुणैर्युक्तो नरो भवति निश्चितम्॥
वृक्षाद्भीः प्रथमे वर्षे षोडशेऽरिकृतं भयम्।
अष्टादशप्रमाणे तु कर्णरुक् परिपीडनम्॥
विंशत्यो प्रमिते वर्षे पीडात्यन्तं प्रजायते।
अष्टत्रिंशन्मिते नूनं पीडा स्यान्मृत्युना समा॥
भोगी दानरतो नित्यं सत्यधर्मपरायणः।
सुभगो विषयासक्तो गीतनृत्यप्रियः सुधीः॥
शास्त्रज्ञः शुभवाक् जीवेदशीतिः शरदां नरः
वैशाखे शुक्ल पक्षे च द्वादश्यां बुधवासरे॥
मध्याह्ने हस्तनक्षत्रे निर्वाणं खलु निर्दिशेत्।
इत्युक्तं मिथुनस्थे तु जन्मकाले कलानिधौ॥

कर्कराशिफलम्—

परोपकृतिकर्ता च सर्वसंग्रहतत्परः।
पुत्रवान् गुणवान् साधुर्भक्तः पित्रोः स्त्रिया जितः॥
अल्पायुः प्रथमे भागे निःस्वोमध्ये सुखी भवेत्।
तृतीये धर्मसंसक्तस्तीर्थयात्रापरायणः।
रेखा तस्य भवेन्नूनं ललाटेमध्यगामिनी॥
वामाङ्गेऽग्निभयं विद्याच्छीर्षरुक् परिपीडितः॥
बान्धवैर्बहुभिर्युक्तो बहुभार्यः प्रजायते।
अग्रहस्थितिवेत्ता च बहुमित्रः प्रियंवदः॥
रोगी स्यात्प्रथमे वर्षे तृतीये लिंगपीडनम्।
एकत्रिंशन्मिते वर्षे सर्पतो भयमादिशेत्॥
द्वात्रिंशत्प्रमिते वर्षे बहुपीडोद्भवो भवेत्।
पंचाशीतिमितं ब्रूयादायुः षण्णवतिः ध्रुवा॥
माघे मासि सितेपक्षे नवम्यां भृगुवासरे।
रोहिणी नाम नक्षत्रे व्रजेदायुः प्रपूर्णताम्॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रसूतौ कर्कराशिस्थे कुमुदानन्दने सति ।
पुराणैर्मुनिभिः प्रोक्तं निर्याणमिति निश्चितम् ॥

सिंहराशिफलम्—

धनधान्यसमायुक्तः श्रीमांश्च समरप्रियः ।
विद्वान्सर्वकलाभिज्ञो विदेशगमनेरतः ॥
विशालः पिङ्गलाक्षश्च क्रोधी स्वल्पात्मजोनरः ।
सर्वगः शत्रुहन्ता च शिरोरुक् निष्ठुरो महान् ॥
भूताद्बाधादिमेवर्षे पंचमेऽब्देऽग्नितो भयम् ।
सप्तमे ज्वरबाधा च नृणां भवति निश्चितम् ॥
विसूचिकोद्भवा पीडा नृणां भवति निश्चितम् ।
विंशन्मितं भयं सर्पदिकविंशे प्रपीडनम् ॥
उदरे सव्य भागे तु वातगुल्मादिसंभवः ।
सुशीलः कृपणोत्यन्तं सत्यवादी विचक्षणः ॥
शुभग्रहोक्षिते चन्द्रे शतायुर्जायते नरः ।
फाल्गुनस्यासिते पक्षे पंचम्यां भौमवासरे ॥
मध्याह्ने जलमध्ये च मृत्युर्नूनं न संशयः ।
सिंहराशिस्थिते चन्द्रे निर्याणमिदमीरितम् ॥

कन्याराशिफलम्—

स्वजनानन्दकृन्नित्यं धनवान्बहुसेवकः ।
प्रवासी च कलाभिज्ञो गुरुभक्तः प्रियंवदः ॥
देवताद्विजवर्याणां भक्तस्तत्परमानसः ।
धर्मकर्मसमायुक्तो जनानामतिदुर्लभः ॥
कन्यकाल्पत्वमापन्नो भूरिपुत्रो भवेन्नरः ।
शिश्नेकण्ठप्रदेशे च लाञ्छनं निश्चितं भवेत् ॥
वह्निपीड़ा तृतीयेऽब्दे पंचमे लोचनव्यथा ।
नवमेद्वारबाधा च त्रयोदशमितेऽपि च ॥
तथा पंचदशे वर्षे सर्पतो भयमादिशेत् ।
एकविंशन्मिते वर्षे पतनं वृक्षभित्तितः ॥
अरण्ये शस्त्रघातः स्याद्वर्षे त्रिंशन्मिते ध्रुवम् ।
अशीत्यब्दं भवेदायुश्चन्द्रे सौम्यग्रहेक्षिते ॥
चैत्रकृष्णात्रयोदश्यां निधनं रविवासरे ।
शीतद्युतौ स्थिते सूतौ कन्यायामिति संस्मृतम् ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तुलाराशिफलम्—

मान्यः सर्वजनैर्नूनं वस्तुसंग्रहतत्परः ।
भोगी धर्मपरः श्रीमान्बहुभृत्यो विचक्षणः ॥
वापीकूपतड़ागादि निर्मितौ सादरः सदा ।
प्राज्ञः सर्वकलाभिज्ञो नृपाणामतिवल्लभः ॥
मधुरान्नरसप्रीतिर्द्विभार्यः पितृभक्तिकृत् ।
स्वल्पापत्योऽल्पबन्धुश्च कृषिकर्मविचक्षणः ॥
क्रयविक्रयसम्प्राप्तिर्देवब्राह्मणपूजकः ।
भार्यावचनोऽनुगामी च सप्तमेऽब्देऽग्निजं भयम् ॥
अष्टमे ज्वरजापीड़ा द्वादशे च जलाद्भयम् ।
तरोस्तुरगतः पातः सर्पभीर्वापि विंशके ॥
एकविंशन्मिते पीड़ा चन्द्रे सौम्यग्रहेक्षिते ।
पञ्चाशीतिर्भवेदायुर्वैशाखस्या दलपक्षके ॥
सार्पेऽष्टम्यां भृगोर्वारे निधनं पूर्वयामके ।
तुलाराशिस्थिते चन्द्रे निर्याणमिति सूचितम् ॥

वृश्चिकराशिफलम्—

परतापपरः क्रोधी विद्वेषी कलहप्रियः ।
विश्वासघातकश्चापि मित्रद्रोही विचक्षणः ॥
असन्तुष्टो नृपैः पूज्यो विघ्नकर्तान्यकर्मणि ।
शुभलक्षणसंयुक्तो गुप्तपापश्च विक्रमी ॥
बहुभृत्यश्चतुर्बन्धुर्द्विभार्यो जायते पुमान् ।
प्रथमेऽब्दे ज्वरात्पीड़ा तृतीये भयमग्नितः ॥
पंचमेऽब्दे ज्वरात्पीड़ा तथा पंचदशेऽपि च ।
पंचविंशन्मिते वर्षे पीड़ा स्यान्महती ध्रुवम् ॥
चन्द्रे सौम्यग्रहैर्दृष्टे नवत्यब्दान्स जीवति ।
ज्येष्ठे मासि सिते पक्षे दशम्यां बुधवासरे ॥
हस्तनक्षत्रसंयुक्ते मध्यरात्रे गते सति ।
चन्द्रे वृश्चिकराशिस्थे निर्याणमिति कीर्तितम् ॥

धनुराशि फलम्—

प्राज्ञो धर्मी सुपुत्रश्च राजमान्यो जनप्रियः ।
द्विजदेवार्चने प्रीतिर्वस्तुसंग्रहतत्परः ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सभायां च भवेद्वक्ता सुनखी सुमतिः शुचिः ।
स्थूलदन्ताधरग्रीवः काव्यकर्ता प्रगल्भकः ॥
कुलशाली वदान्यश्च सभाग्यो दृढसौहृदः ।
निम्नपादनलः क्लेशी साहसो विनयान्वितः ॥
शान्तः क्षिप्रप्रकोपी च तापसः स्वल्पभुक् नरः ।
स्वल्पापत्यः सुबन्धुश्च पूर्ववयसि-वित्तमान् ॥
सबाधः प्रथमे वर्षे महापीड़ा त्रयोदशे ।
अष्टषष्टिमितं प्राहुरायुर्वा पंचसप्ततिः ॥
चन्द्रे सर्वशुभैर्दृष्टे शतवर्षाणि जीवति ।
आषाढ़स्यासिते पक्षे पंचम्यां भृगुवासरे ॥
निशायां हस्तनक्षत्रे निधनं सर्वथा भवेत् ।
निर्याणमिति संप्रोक्तं चन्द्रे सूतौ धनुस्थिते ॥

मकरराशिफलम्—

धीरो विचक्षणः क्लेशी पुत्रवान् नृपतिप्रियः ।
कृपालुः सत्यसंपन्नो वदान्यो सुभगोऽलसः ॥
कृष्णतालुः पुमान्नूनं विस्तीर्णकटिरुद्भवेत् ।
पञ्चमे वत्सरे पीड़ा सप्तमे च जलाद्भयम् ॥
दशमे पतनं वृक्षाद् द्वादशे शस्त्रपीडनम् ।
विंशन्मिते ज्वराद्बाधा शाखासु पञ्चविंशके ॥
पञ्चत्रिंशत्समाकाले वामाङ्गेऽग्निभयं दिशेत् ।
अब्दानां नवतिर्नूनं आयुस्तस्य प्रकीर्तितम् ॥
श्रावणस्य सितेपक्षे दशम्यां भौमवासरे ।
ज्येष्ठायां निधनं नूनं चन्द्रे मकरसंस्थिते ॥

कुम्भराशिफलम्—

दाता मिष्टानभोक्ता च धर्मकार्येषु सत्वरः ।
प्रियवक्तृत्वसंयुक्तो नरः क्षीणकलेवरः ॥
स्वल्पापत्यो द्विभार्यश्च कामी द्रव्यविवर्जितः ।
वामहस्ते भवेल्लक्ष्म पीडा प्रथमवत्सरे ॥
पञ्चमेऽग्निभयं विद्यादथ द्वादशवत्सरे ।
व्यालाद्वा जलतो भीतिरष्टविंशतमे क्षतिः ॥
चौरेभ्यश्च भवेदायुर्वर्षाणां नवतिध्रुवम् ।
भाद्रेमास्यसिते पक्षे चतुर्थ्यां शनिवासरे ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

भरणीनाम नक्षत्रे गृणन्ति मरणं नृणाम् ।
एवमुक्तं मुनि श्रेष्ठैश्चन्द्रे जन्मनि कुम्भगे ॥

मीनराशिफलम्—

धनीमानीविनीतश्च भोगी संहृष्टमानसः ।
पितृमातृसुराचार्यगुरुभक्तियुतो नरः ॥
उदारो रूपवान् श्रेष्ठो गन्धमाल्यविभूषणः ।
पञ्चमेऽब्दे जलाद्भीतिरष्टमे ज्वरपीडनम् ॥
द्वाविंशे महती पीड़ा चतुर्विंशन्मितेऽब्दके ।
पूर्वाशागमनं चायुरब्दानां नवतिः स्मृता ॥
आश्विनस्यासिते पक्षे द्वितीयायां गुरोर्दिने ।
कृत्तिकानाम नक्षत्रे सायं मृत्युर्न संशयः ॥
इतीरितं तु निर्याणं यवनाचार्यसम्मतम् ।
मीनस्थे यामिनीनाथे भवेदत्र न संशयः ॥

दृष्टि फलम्—

क्षेत्राधिपसन्दृष्टे शशिनि नृपस्तत्सुहृद्भिरपि धनवान् ।
द्रेष्काणांशकपैर्वा प्रायः सौम्यैः शुभं नाऽन्यैः ॥ ३ ॥

सं०—शशिनि=चन्द्रे, क्षेत्राधिपसंदृष्टे=स्वस्थितराशीश्वरेणावलोकिते, जातः नृपः=भूपतिः, स्यात् । सुहृद्भिः=चन्द्राक्रान्तराशीश्वरमित्रैः, अपि, सन्दृष्टे चन्द्रे जातः धनवान् भवति । वा द्रेष्काणांशकपैः=द्रेष्काणनवांश द्वादशांशत्रिंशांशाधिपैः, चन्द्रे दृष्टे जातकः धनी भवति । एषु योगेषु सौम्यैः= शुभग्रहैः, प्रायः शुभं फलं, अन्यैः=पापैः, न शुभं फलं ज्ञेयमिति ॥३॥

हि०—जन्मकुण्डली में चन्द्रमा जिस राशि में हो उस राशि के स्वामी से यदि देखा जाय तो जातक राजा हो और राशीश के मित्र ग्रह से दृष्ट हो तो धनी होता है। अथवा चन्द्रमा जिस द्रेष्काण, नवांश, द्वादशांश एवं त्रिंशांश में हो उसके स्वामी से चन्द्र दृष्ट हो तो जातक धनी हो। इन योगों में यदि राशीश्वर आदि शुभ ग्रह हों तो पूर्ण शुभ और पापग्रह हों तो पूर्ण शुभ फल नहीं होता है। मेरे विचार से राशीश्वर के अतिरिक्त शुभदृष्ट चन्द्र शुभ और पापदृष्ट चन्द्र अशुभ है ॥३॥

वि०—इस श्लोक में क्षेत्राधिप या उसके मित्र और द्रेष्काणेश आदि से चन्द्र दृष्ट होने से जातक को भूप या धनी कहा गया है। यदि अन्य अर्थात् क्षेत्रादि अधिप से भिन्न ग्रह चन्द्रमा को देखे उसके लिये शुभ ग्रह का फल शुभ और पाप ग्रह का

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

फल अशुभ कहा गया है। अन्य टीकाकारों ने क्षेत्राधिप या द्रेष्काणेशादि के शुभ होने पर शुभ और पाप होने से अल्प शुभ फल कहा है। यह विचारणीय है। मित्र की दृष्टि में धनी तो शत्रु ग्रह की दृष्टि में निर्धन जानना चाहिये।

भावफलम्—

पुष्णन्ति शुभा भावान्मूर्त्यादीन् घ्नन्ति संस्थिताः पापाः।
सौम्याः षष्ठेऽरिघ्नाः सर्वेऽरिष्टा व्ययाष्टमगाः ॥ ४ ॥

सं०—शुभाः=शुभग्रहाः, लग्नादिद्वादशभावेषु संस्थिताः=व्यवस्थिताः, सन्तः मूर्त्यादीन्=लग्नादीन्, भावान्, पुष्णन्ति=वृद्धिं कुर्वन्ति। पापाः=पापग्रहाः, संस्थिताश्चेत्तदा तान् भावान् घ्नन्ति=विनाशयन्ति। षष्ठे=लग्नात्षष्ठस्थाने, शुभाः=शुभग्रहाः, अरिघ्नाः=रिपुनाशकाः, भवन्ति। व्ययाष्टमगाः=द्वादशाष्टमस्थानगताः, सर्वेग्रहाः, अरिष्टा=नेष्टाः, भवन्ति ॥४॥

हि०—शुभ ग्रह लग्न आदि द्वादश भावों में रहें तो भावों की वृद्धि करते हैं। पाप ग्रह रहने से भावों की हानि करते हैं। लग्न से छठाँ स्थान में शुभ ग्रह रहने से शत्रुनाशक होते हैं। लग्न से १२।८ में सभी शुभ या अशुभ ग्रह अनिष्टकारक होवे हैं ॥४॥

वि०—जिस भाव में शुभ ग्रह हो उसकी वृद्धि और पाप से हानि होती है। 'यो यो भावः स्वामिदृष्टो युतो वा' इसके अनुसार जिस भाव का स्वामी पाप ग्रह होकर उस भाव में हो तो वहाँ उसकी वृद्धि समझनी चाहिये। भावेश के मित्र में शुभ फल और शत्रु होने से अशुभ फल होगा। श्लोक में सामान्य रूप से शुभाशुभ ग्रहवश विचार किया गया है। लग्न से (३।६।११।१०) ये उपचय-स्थान हैं। इनमें षष्ठस्थान शत्रु का है। शुभग्रह शत्रुनाशक और पाप शत्रुवर्द्धक हैं, अतः शुभग्रह का फल शुभ कहा गया है। शेष ३।११।१० में शुभ या पाप क्रम से पराक्रम लाभ और कर्म के वर्द्धक होते हैं।

वृहज्जातक में "विपरीतं रिःफषष्ठाष्टमेषु" यह कहा गया है। इसके अनुसार ६।८।१८ में शुभग्रह शुभ और पापग्रह अशुभ सिद्ध होता है। यहाँ ८।१२ में सभी ग्रह को अशुभ कहा गया। बराह मिहिर ने अपने ग्रन्थों में अन्याचार्यों का भी मत प्रकाशित किया है उनका विचार है कि—

"ज्योतिषमागमशास्त्रंविप्रतिपत्तौ न योग्यमस्माकम्।
स्वयमेव विकल्पयितुं किन्तु बहूनां मतं वक्ष्ये ॥"

लघुजातक निर्माणकाल में अनेक वचन ८।१२ में स्थित सभी ग्रहों के फल अशुभद मिले, अतः वैसा प्रतिपादन किया गया।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वस्तुतः फलादेश में केवल स्थानवश फल सामान्य है। स्व, मित्र, शत्रु, उदासीन, उच्च, नीच, मूलत्रिकोण और बलाबल के विचार से सूक्ष्म फलादेश होता है। इसलिए ज्योतिषी को तदनुसार फलादेश करना उचित है। विशेष भाव-फल ग्रन्थान्तर में देखना चाहिये।

लग्नगतचन्द्रफलम्—

कर्कवृषाजोपगते चन्द्रे लग्ने धनी सुरूपश्च।
विकलाङ्गजडदरिद्राः शेषेषु विशेषतः कृष्णे ॥ ५ ॥

सं०—कर्कवृषाजोपगते=कर्क-वृष-मेष-राषि-गते, चन्द्रे=शशिनि, लग्ने=लग्नस्थे, तदा जातकः धनी=धनवान्, सुरूपः=सुन्दरः, च भवति। शेषेषु=अन्यराशिषु, स्थिते चन्द्रे लग्नगते सति जातकाः, विकलाङ्गजडदरिद्राः=क्षीणाङ्गमूर्खनिर्धनाः, भवन्ति। कृष्णे=कृष्णपक्षे, विशेषतः=विशेषरूपेण, विकलाङ्गादीनां जन्म भवतीत्यर्थः ॥५॥

हि०—जन्मकाल में यदि कर्क, वृष और मेषराशि का चन्द्र लग्न में हो तो जातक धनी और रूपवान् होता है। शेष राशि के चन्द्र लग्नस्थ होने से जातक अङ्गहीन, मूर्ख और निर्धन होता है। कृष्णपक्ष में यदि जन्म हो और ३।५।६।७।८।९। १०।११।१२ इन राशियों का चन्द्र लग्न में हो तो विशेष रूप से अङ्गविकलादि जानना चाहिये ॥५॥

सूर्यफलम्—

विकलेक्षणोऽर्कलग्ने तैमिरिकोऽजे स्वभे तु रात्र्यन्धः।
बुद्बुद्दृष्टिः कर्किणि काणो व्ययगे शशांके वा ॥ ६ ॥

सं०—अर्कलग्ने=लग्नस्थिते सूर्ये, जातः विकलेक्षणः=क्षीणदृष्टिकः, अजे=मेषस्थेऽर्के, लग्नगते सति तैमेरिकः=तिमिरहतदृष्टिः, स्वभे=सिंह राशिस्थे सूर्ये लग्ने सति, तु, रात्र्यन्धः=निशान्धः, कर्किणि=कर्कस्थेऽर्के लग्ने सति, बुद्बुद्दृष्टिः=पुष्पिताक्षः, व्ययगे=लग्नात् द्वादशस्थे सूर्ये, काणः=अन्धः भवति। वा=अथवा शशाङ्के=चन्द्रे, व्ययगे=लग्नात् द्वादशस्थे, तदा जातकः काणो भवति ॥६॥

हि०—लग्न में सूर्य हो तो जातक क्षीणदृष्टि वाला होता है। मेष राशि का सूर्य लग्न में हो तो तैमेरिक (आँख में धुंधलापन रोग), सिंह राशिस्थ रवि लग्न में हो तो रात्र्यन्ध (रतौंधी रोग), कर्क लग्नस्थ रवि में बुद्बुद्दृष्टि और लग्न से

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

द्वादश रवि में काना होता है। अथवा चन्द्र द्वादश में होने से भी जातक काना होता है। यहाँ सूर्य से दक्षिण नेत्र और चन्द्र से वाम नेत्र काना समझना चाहिये ॥६॥

वि०— विकलाङ्ग-योग—

१—लग्न से १।४।७।१० में पापग्रह हो तो विकलाङ्ग।
२—रवि और चन्द्र लग्न से १।४।७।१० में हो तो विकलाङ्ग।
३—लग्नस्थ शुक्र को शनि देखता हो तो विकलाङ्ग।
४—चौथे में शुक्र हो और शनि, मंगल या बुध से युत गुरु हो तो विकलाङ्ग।
५—१० में चन्द्र ७ में मंगल और रवि से २ में शनि होने से विकलाङ्ग।
६—पापदृष्ट मंगल लग्न से ५।९ में हो तो विकलाङ्ग।
७—लग्न से २ में शनि, १० में चन्द्र और ७ में बुध हो तो विकलाङ्ग।
८—कुम्भ राशि में रवि और शुक्र, चन्द्र और शनि नीचस्थ हो तो विकलाङ्ग।

नेत्ररोग-योग

१—षष्ठेश वक्री ग्रह की राशि में हो।
२—लग्नेश बुध या मंगल की राशि में हो और उसे बुध मंगल देखते हों।
३—लग्नेश और अष्टमेश लग्न से षष्ठस्थ हों।
४—लग्न से ६।८ में शुक्र दक्षिण नेत्ररोग कारक।
५—धनेश पर शुभ दृष्टि और लग्नेश पाप के साथ हो।
६—लग्न से २।१२ के स्वामी शनि-मंगल से युत दृष्ट हो।
७—लग्न से २।१२ में शनि दृष्ट पाप ग्रह हों।
८—द्वितीयेश और द्वादशेश के नवांशेश पाप राशि में हों।
९—लग्न अष्टम में पाप दृष्ट शुक्र हो।
१०—शयनावस्था का मंगल लग्न में हो।
११—शुक्र के साथ द्वितीयेश हो।
१२—शुक्र से ३।८।१२ में द्वितीयेश और द्वादशेश हो।
१३—पापदृष्ट रवि लग्न से ५।९ में हो।

अन्ध योग—

१. शनि, मंगल ९।५ में हो और लग्न में ग्रहण कालिक सूर्य हो।
२. रवि और शुक्र के साथ द्वितीयेश और द्वादशेश होकर ६।८।१२ में हो।
३. लग्न से ५।८।१२ में चन्द्र, मंगल का योग तथा ६।८।१२ में गुरु के साथ चन्द्र हो।
४. चन्द्र, रवि और शुक्र लग्न से ६।८।१२ में हों।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

५. बुध चन्द्र का योग ६।८।१२ में और चन्द्र सूर्य का योग १।४।७।१०।३ में हो।

६. अशुभ राशि का मंगल केन्द्र में हो और मकर या बुध का रवि लग्न से सप्तम में हो।

७. पाप दृष्ट शुभ ग्रह लग्न से ६।८।१२ में हो या शुभ-लाभ में मंगल हो।

८. द्वितीयेश और द्वादशेश के साथ शुक्र तथा लग्नेश ६।८।१२ में हों।

९. शुक्र और पाप ग्रहों के साथ लग्न से द्वितीय में चन्द्र हो।

१०. लग्न से ४।५ में सभी पापग्रह हों या पाप दृष्ट चन्द्र ६।८।१२ में हो।

११. शुभ दृष्टि-रहित रवि और चन्द्र लग्न से १२ में हो या सिंह लग्न में शुक्र, मंगल या शनि हो।

१२. शनि, चन्द्र और रवि क्रम से १२।२।८ में हों।

१३. लग्न से ६।८।१२ में चन्द्र, रवि और मंगल हों।

१४. लग्न या शुक्र से ५ में रवि दृष्ट राहु हो या पाप दृष्ट शनि लग्न से चतुर्थ हो।

१५. चन्द्र शुक्र का योग ६।८।१२ में हो या द्वितीयेश द्वादशेष शुक्र और चन्द्र के साथ लग्न में हो।

१६. लग्न से ६।८।१२ में लग्नेश और धनेश हो।

१७. शनि दृष्ट सिंह लग्न में चन्द्र सूर्य का योग हो।

१८. लग्न से १२ में मंगल वामनेत्र घातक और द्वितीय में शनि दक्षिण नेत्र घातक।

काण योग—

१. शुक्र और गुरु से दृष्ट मंगल या चन्द्र लग्न में हो।

२. मंगल दृष्ट सिंह राशिस्थ चन्द्र लग्न से सप्तम में हो।

३. मंगल दृष्ट रवि कर्क राशि में होकर लग्न से ७ में हो।

४. लग्न से १२ या ७ में चन्द्र शुक्र का योग हो।

५. लग्न से १२ में चन्द्र और ६ में रवि।

६. लग्न में रवि चन्द्र का योग हो और उसे शुभ और पाप देखते हों तो बुद्बुद लोचन हो।

७. पापग्रह के साथ सूर्य १२।९।५ में हो।

भाव फल विचार—

इष्टं पादविवृद्ध्या मित्रस्वगृहत्रिकोणतुङ्गेषु।
रिपुभेऽल्पं फलमर्कोपगतस्य पापं शुभं नैव ॥ ७ ॥

७ लघु०

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सं०—मित्रस्वगृहत्रिकोणतुङ्गेषु—मित्रग्रहस्वगेहमूलत्रिकोणस्वोच्चस्थानेषु, पादविवृद्ध्या = चरणवृद्धिक्रमेण, इष्टं=शुभंफलं, ग्रहः प्रयच्छति। रिपुभे= शत्रुगृहे स्थितो ग्रहः, अल्पं=चतुर्थांशादप्यल्पं, फलं प्रयच्छति। अर्कोपगतस्य= अस्तंगतस्य, ग्रहस्य, पापं=अशुभफलं, पूर्णं भवति किन्तु शुभं=शुभफलं, नैव=न भवतीत्यर्थः ॥ ७ ॥

हि०—जन्म समय जिस भाव राशि में ग्रह हो वह राशि उस ग्रह की मित्रराशि हो तो उस भाव का शुभ फल १ चरण, अपनी राशि होने से शुभ फल का आधा अर्थात् २ चरण; मूलत्रिकोण हो तो ३ चरण और उच्चराशि हो तो पूर्णशुभफल ४ चरण देता है। शत्रुक्षेत्रस्थ ग्रह १ चरण से भी अल्प फलकारक होता है। रवि के साथ अस्त ग्रह एवं नीचराशिस्थ ग्रह पूर्ण अशुभभावफल देते हैं किन्तु शुभभाव फल कुछ भी नहीं देते। अशुभ फल भी अस्त-नीच, शत्रुक्षेत्र, मित्रक्षेत्र, स्वक्षेत्र, मूलत्रिकोण, और उच्चस्थानस्थ ग्रह क्रम से पूर्ण; पादोन, अर्द्ध, चतुर्थांश, चरणाल्प और शून्य होता है, अर्थात् अस्त या नीचस्थ ग्रह पूर्ण अशुभ फल, शत्रुक्षेत्रस्थ पादोन; मित्रक्षेत्रस्थ आधा, स्वराशिस्थ १ चरण, मूलत्रिकोणस्थ चरणाल्प और उच्चस्थ ग्रह शून्य फल देता है ॥ ७ ॥

वि०—उक्त श्लोक में शत्रु, मित्र के अतिरिक्त समराशिस्थ फल नहीं कहा गया है अतः समराशिस्थ फल मध्यम जानना चाहिये। नीच एवं अस्तमें शून्य फल होता है यह वृहज्जातक में है। यथा—

उच्च त्रिकोण स्वसुहृच्छत्रुनीचग्रहार्कगैः।
शभं सम्पूर्णपादोनदलपादाल्पनिष्फलम् ॥

इति राशिशीलनिरूपणम्।

—: ० :—

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

आश्रययोग निरूपणम्

तत्र मेषादिराशिनवांश फलम्—

तस्करभोक्तृविचक्षणधनिनृपतिनपुंसकाऽभयदरिद्राः ।
खलपापोग्रोत्कृष्टा मेषादीनां नवांशभवाः ॥ १ ॥

सं०—मेषादीनां राशीनां नवांशभवाः=नवांशोत्पन्नाः तस्करभोक्तृविचक्षणादिगुणसम्पन्नाः भवन्ति। अर्थात् मेषनवांशगतलग्नोत्पन्नः तस्करः=चौरः, वृषनवांशे भोक्ता=भोगी, मिथुननवांशे विचक्षणः=पण्डितः कर्कनवांशे धनी=धनवान्, सिंहनवांशे नृपतिः=राजा, कन्यानवांशे नपुंसकः=पुंस्त्वहीनः, तुलानवांशे अभयः=शूरः, वृश्चिकनवांशे दरिद्रः=निर्धनः, धनुनवांशे खलः=दुष्टः, मकरनवांशे पापः=पापकर्मकर्ता, कुम्भनवांशे उग्रः=क्रूरकर्मा, मीननवांशे उत्कृष्टः=श्रेष्ठः पुरुषः, भवतीत्यर्थः ॥ १ ॥

हि०—जिसके जन्मलग्न में मेष नवांश हो वह चोर, वृषनवांश हो तो भोगी, मिथुननवांश हो तो चतुर पण्डित, कर्कनवांश हो तो धनी, सिंहनवांश हो तो राजा, कन्यानवांश हो तो नपुंसक, तुलानवांश हो तो शूर, वृश्चिकनवांश होने से निर्धन, धनुनवांश हो तो दुष्ट, मकरनवांश होने से पापी, कुम्भनवांश हो तो हिंसक और मीननवांश हो तो श्रेष्ठ पुरुष होता है ॥ १ ॥

वि०—नवांश का फल जो कहा गया है वह यदि वर्गोत्तम नवांश का हो तो नवांश फल का अधिप जानना चाहिये। वृहज्जातक में "वर्गोत्तमांशेष्वेषामीशा राशिवद् द्वादशांशैः" यह कहा गया है। द्वादशांश के फल राशिफल के समान होते हैं।

स्वगृहादिगत ग्रहाणां फलानि—

कुलतुल्यकुलाधिकबन्धुमान्यधनिभोगिनृपसमनरेन्द्राः ।
स्वर्क्षगतैकविवृद्ध्या किञ्चिन्न्यूनाः सुहृद्गृहगैः ॥ २ ॥

सं०—एक विवृद्ध्या=एकाधिकग्रहवृद्धिक्रमेण, स्वर्क्षगतैः=स्वराशिस्थितैः ग्रहैः, कुलतुल्यकुलाधिकादयो भवन्ति। अर्थात् यस्य जन्मकाले एकोग्रहः स्वगृहगतो भवति स जातकः कुलतुल्यः=स्वकुलसमो, भवति। द्वौ स्वक्षेत्रस्थौ तदा कुलाधिकः=निजकुलश्रेष्ठः, त्रयः स्वगृहगतास्तदा बंधुमान्यः, चत्वारोग्रहाः स्वगेहस्थास्तदा धनी, पञ्चनिजक्षेत्रस्थास्तदा भोगी, षट्ग्रहाः स्वभवनस्थास्तदा,

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

नृपसमः=राजतुल्यः, सप्तग्रहाश्चेत्स्वगृहस्थाःतदा जातकः नरेंद्रः=नृपः, भवति। सुहृद्गृहगैः=मित्रभवनस्थैग्रहैः, किञ्चिन्न्यूनाः भवन्ति ॥ २ ॥

हि०—जिस जातक के जन्म समय १ ग्रह स्वगृही का हो वह कुलसदृश, दो हो तो कुल में श्रेष्ठ, तीन होने से बन्धु पूज्य, चार हो तो धनवान, पाँच होने से भोगी छह हो तो राजा के समान सुख भोगने वाला और सात होने से राजा होता है। इसी तरह मित्रगृहगत ग्रहों का फल पूर्वोक्त फल की अपेक्षा कुछ न्यून होता है ॥ २ ॥

विशेष—बृहज्जातक में मित्र गृहस्थ एकाधिक ग्रहों का फल निम्नरीति से वर्जित है—

परविभवसुहृत्स्ववन्धुपोष्या गणपवलेशनृपाश्च मित्रभेषु ।

१ मित्र गृही हो तो अन्य धन से पालित, २ में मित्र द्वारा, ३ में स्वजाति द्वारा ४ में बन्धुद्वारा, ५ में नायक, ६ में सेनापति और ७ ग्रह मित्र घर का होने से जातक राजा होता है।

उच्चस्थ गृहाणां फलानि—

त्रिप्रभृतिभिरुच्चस्थैर्नृपवंशभवा भवन्ति राजानः ।
पंचादिभिरन्यकुलोद्भवाश्च तद्वत्त्रिकोणगतैः ॥ ३ ॥

सं०—त्रिप्रभृतिभिः=त्रिचतुर्भिः, ग्रहैः, उच्चस्थैः=स्वोच्चराशिगतैः, नृपवंशभवाः=राजकुलोत्पन्ना, राजानः=नृपाः, भवन्ति। पञ्चादिभिः=पंचषड्सप्तभिग्रहैः, उच्चगतैः, अन्यकुलोद्भवाः=राजकुलातिरिक्तवंशोत्पन्नाः, नृपाः भवन्ति। त्रिकोणगतैः=मूलत्रिकोणस्थितैर्ग्रहैः, तद्वत् = उच्चगतग्रहफलवत्, फलं ज्ञेयमिति ॥ ३ ॥

हि०—जन्म समय में तीन या चार ग्रह अपनी उच्चराशि में होने से राजवंशोद्भव जातक राजा होता है, अन्यथा धनी। यदि ५, ६ या ४ ग्रह उच्च में हों तो अन्य कुल में उत्पन्न भी जातक राजा होता है। इसी तरह मूलत्रिकोण में यदि ३ या ४ ग्रह हों तो राजकुलोद्भव, और ५।६।७ ग्रह हों तो अन्य कुल में उत्पन्न जातक भी राजा होता है ॥ ३ ॥

नीचराशिस्थ ग्रहाणां फलानि—

निर्धनदुःखितमूढव्याधितबन्धाभितप्तवधभाजः ।
एकोत्तरपरिवृद्ध्या नीचगतैः शत्रुगृहगैर्वा ॥ ४ ॥

सं०—एकोत्तरपरिवृद्ध्या=एकाधिकग्रहवृद्धिक्रमेण, नीचगतैः=नीचराशिस्थैर्ग्रहैः, वा शत्रुगृहगैः = शत्रुराशिगतैः, निर्धनदुःखितमूढादयः परिपाका-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

भवन्ति। यथा-एकः नीचैः वा शत्रुगृहे जातः निर्धनः, द्वाभ्यां दुःखितः, त्रिभिर्मूढः, चतुर्भिर्व्याधितः, पञ्चभिर्बन्धः, षड्भिरभितप्तः, सप्तभिर्बंधभाजो भवतीति ॥ ४ ॥

हि०--१ ग्रह नीचराशि या शत्रुराशि में हो तो जातक निर्धन, २ में दुःखी, ३ में मूर्ख, ४ में रोगी, ५ में बन्धन, ६ में पीड़ित और ७ में बधभागी होता है। सातों ग्रह नीच में एक समय नहीं होंगे परन्तु शत्रु गृही के हो सकते हैं ॥ ४ ॥

राजयोगौ--

एकोऽपि नृपतिजन्मप्रदो ग्रहः स्वोच्चगः सुहृद्दृष्टः।
बलिभिः केन्द्रोपगतैस्त्रिप्रभृतिभिरवनिपालभवः ॥ ५ ॥

सं०--स्वोच्चगः=स्वोच्चराशिस्थः, सुहृद्दृष्टः=मित्रावलोकितः, एकः, अपि, ग्रहः, नृपतिजन्मप्रदो=भूपजन्मदः, भवति। बलिभिः=बलिष्ठैः, त्रिप्रभृतिभिः=त्रिचतुष्टयादिभिर्ग्रहैः, केन्द्रोपगतैः=केन्द्रस्थितैः, अवनिपालभवः=नृपवंशोत्पन्नः, जातकः राजा भवति ॥ ५ ॥

हि०--मित्रग्रह से दृष्ट एक भी ग्रह यदि उच्च में हो तो जातक राजा होता है। तीन चार आदि ग्रह यदि बलवान् होकर लाभ से १।४।७।१० में हो तो राजकुल में उत्पन्न जातक राजा होता है ॥ ५ ॥

अन्य योगः—

वर्गोत्तमगे चन्द्रे चतुराद्यैर्वीक्षिते विलग्ने वा।
नृपजन्म भवति राज्यं नृपयोगे बलयुतदशायाम् ॥ ६ ॥

सं०--चतुराद्यैः=चतुष्प्रभृतिभिः, ग्रहैः, वीक्षिते=दृष्टे, चन्द्रे वा विलग्ने वर्गोत्तमगे=वर्गोत्तमनवांशस्थे, नृपजन्म=भूपतिजन्म, भवति। नृपयोगे सति, बलयुतदशायां=बलीग्रहदशान्तर्दशायां, राज्यं=राज्यप्राप्तिः, भवति ॥ ६ ॥

हि०—चार, पाँच या छह ग्रहों से दृष्ट चन्द्र या लग्न अपनी अपनी वर्गोत्तम नवांश में हो तो जातक राजा होता है। राजयोग रहने पर योगकारक बलीग्रह की दशा, अन्तर्दशा आदि में राज्य मिलता है ॥ ६ ॥

विशेष—अन्यान्य कुछ राजयोग नीचे दिये जाते हैं—

राजाधिराज योग—

१. ६ ग्रह उच्च में हों या नवमेश-पञ्चमेश से दृष्ट दशमेश और सुखेश परस्पर एक दूसरे के घर में हों।
२. लग्नेश के साथ नवमेश और पञ्चमेश लग्न से १।४।१० में हो।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

३. चन्द्र से ३ में शनि-रवि, ४ में बुध-शुक्र और ११ में गुरु हों।
४. लग्न में गुरु, ७।४ में रवि और वक्री शुक्र ५ में हों।
५. लग्न से १० में मंगल, ९ में बुध, चन्द्र और शुक्र, तथा मेष राशि में रवि-गुरु का योग हो।
६. लग्न से ११ में शनि, कन्यालग्न में बुध, मीन में गुरु, धनु में शुक्र-मंगल, वृश्चिक में रवि हो।
७. लग्न से ९ में शनि, ५ में बुध-गुरु-शुक्र और उच्चराशि में मंगल हो।
८. सभी ग्रह चर राशि में हों।
९. लग्न से ३ में शनि, ६ में मंगल, १० में शुक्र, ९ में उच्चस्थ रवि हों।
१०. पञ्चमेश बली हो और केन्द्र में नवमेश-दशमेश का योग हो।
११. दशमेश देवलोकांश में, धनेश-नवमेश पारावतीश में, लाभेश गोपुरीश में हो।
१२. २।६।८।१२ इन राशियों में अथवा ३।५।९।११ इनमें सभी ग्रह हों।
१३. ६।७।९।१० इन राशियों में या ३।६।४।९।१२ में सभी ग्रह हों।
१४. १।३।५।६।८।९।११।१२ इन राशियों में सभी ग्रह हों।

भूपतियोग—

१. शनि, मंगल और गुरु उच्चस्थ हों तथा कर्क, तुला या मकर लग्न हो।
२. शनि, रवि और मंगल उच्चस्थ हों और मेष, तुला या मकर लग्न में हो।
३. उच्च राशिगत गुरु या रवि लग्न में हो तथा चन्द्र कर्क में हो।
४. कर्क में चन्द्र और उच्चस्थ शनि रवि में कोई एक लग्न में हो।
५. मेष या मकर लग्न हो, कर्क में चन्द्र और रवि-मंगल उच्च में हों।
६. कर्क लग्न में चन्द्र हो और गुरु-मंगल उच्च में हों।
७. तुला या मकर लग्न हो, कर्क में चन्द्र और शनि-मंगल उच्च में हो।
८. मेष लग्न में रवि और कर्क में चन्द्र या कर्क लग्न में चन्द्र-गुरु का योग हो।
९. मकर लग्न में मंगल या तुला लग्न में शनि और कर्क में चन्द्र हो।
१०. लग्न या चन्द्र से नवमेश और दशमेश ये दोनों परस्पर एक दूसरे के घर में हों।
११. चर लग्न हो और शनि, रवि, मंगल और गुरु उच्च में हों।
१२. लग्न में शनि, मकर में मंगल और धनु में रवि-चन्द्र हो।
१३ मकर लग्न में चन्द्र-मंगल और धनु में रवि हो।
१४. लग्न से ७ में चन्द्र-शनि, लग्न में रवि और धनु में गुरु हो।
१५. मेष या कर्क लग्न हो और मंगल मेष में, गुरु कर्क में हो।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१६. आत्मकारक से ३।६ में सभी पाप ग्रह हों।
१७. कर्क लग्न हो ४ में शनि मंगल, १० में बुध, गुरु, रवि और शुक्र हों।
१८. कुम्भ लग्न में शुक्र हो और चार ग्रह स्वगृही के हों।
१९. बली चन्द्र से दृष्ट शनि-मंगल नवम में हों।
२०. लग्नेश और शुभ ग्रह ३।६।१०।११ में हों।
२१. राहु मंगल और चन्द्र बली होकर लग्न से ५ में हों।

अध्यायस्थ विषयकथनम्—

उडुपतियोगसमागमभशीलसंदर्शनानि भावाश्च।
आश्रयराज्यप्रभावाश्चाध्यायेऽस्मिन् क्रमेणोक्ताः ॥ ७ ॥

सं०—स्पष्टम्।

हि०—इस प्रकीर्णाध्याय में उडुपति योग (चन्द्रयोग), समागम (द्विगृहादि योग), भशील (राशिशील), सन्दर्शन (दृष्टिफल), भाव (भावफल), आश्रय (नवांशादि फल), और राज्यप्रभाव (राज योग) क्रम से कहे गये हैं ॥ ७ ॥

इति लघुजातके प्रकीर्णाध्यायः द्वादशः।

—०—

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथ नाभसयोगाध्यायः ।

आश्रय योगाः—

चरभवनादिषु सर्वैराश्रयजा रज्जुमुसलयोगाः ।
ईर्ष्युर्मानी धनवान् क्रमेण कुलविश्रुताः सर्वे ॥ १ ॥

सं०—चरभवनादिषु=चरस्थिरद्विस्भावराशिषु, सर्वैः=सूर्यादभिग्रहैः स्थितै स्तदा, आश्रयजा=आश्रययोगोद्भवाः, रज्जुमुसलनलयोगाः भवन्ति । अर्थात् सर्वेग्रहाश्चरराशिगतास्तदा रज्जुः, स्थिरमेषु गतास्तदा मुसलः, द्विस्वभाव-गतास्तदा नलयोगो भवतीति । तत्र क्रमेण रज्जुयोगोत्पन्नः जातकः ईर्ष्युः= परममत्सरः, भवति । मुसलोद्भवः मानी, नलोद्भवः धनवान् भवति । सर्वे आश्रययोगोद्भवाः, कुलविश्रुताः=स्वकुले विख्याताः, भवन्तीति ॥ १ ॥

हि०—चरराशियों में सभी ग्रह हों तो रज्जु नामक योग, स्थिर राशि में सभी ग्रह हों तो मुसल और द्विस्वभाव—राशि में सभी ग्रह होने से नलयोग होता है। ये तीनों आश्रय योग हैं। रज्जुयोग में उत्पन्न जातक ईर्ष्यावान्, मुसल योग में मानी और नलयोग में धनी होता है। इन तीनों योगों में उत्पन्न जातक कुलविश्रुत होते हैं ॥ १ ॥

वि०—इस अध्याय में आश्रय, दल, आकृति और सांख्य योग के भेद से नाभस योग चार तरह के हैं। इनमें आश्रय योग के भेद ३, दल योग के भेद २, आकृति-योग के भेद २० और सांख्य योग के भेद ६ होते हैं। सभी के योग ३२ हैं।

दलयोगौ—

केन्द्रत्रयगैः पापैः शुभैर्दलाख्यावहिश्च माला च ।
सर्पेऽतिदुःखितानां मालायां जन्म सुखिनां च ॥ २ ॥

सं०—पापैः=पापग्रहैः, केन्द्रत्रयगैः=केन्द्रसम्बन्धिस्थानत्रयस्थैः, एवं शुभैः=शुभग्रहैश्च, दलाख्यौ=दल संज्ञकौ, अहिः=सर्पः, मालाः=माला नामकः, च, योगौ भवतः । अर्थात्पापग्रहस्थितैः सर्पयोगः, शुभग्रहस्थैः माला योगो भवति । तत्र सर्प=सर्पयोगे, दुःखितानां जन्म भवति, मालायां=माला-योगे, सुखिनां च जन्म—भवतीत्यर्थः ॥ २ ॥

हि०—जन्म-समय किन्हीं तीन केन्द्र स्थान में केवल पांप ग्रह हों तो अहि (सर्प) योग और पाप रहित केवल शुभ ग्रह होने से माला नामक योग होता है। ये दोनों

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

दल संज्ञक योग हैं। सर्पयोग में उत्पन्न जातक दुःखी और मालायोग में सुखी होता है। ॥ २॥

वि०—यहाँ शुभ ग्रह से बुध, गुरु और शुक्र और पाप ग्रह—से शनि, रवि और मंगल जानना चाहिये। इस योग में चन्द्र का ग्रहण नहीं है।

आकृति संज्ञक गदादि योगाः—

द्विरनन्तरकेन्द्रस्थैर्गदाविलग्नास्तसंस्थितैः शकटम्।
खचतुर्थयोर्विहङ्गः शृङ्गाटकमुदयसुतनवगैः ॥ ३ ॥
शृङ्गाटकतोऽन्यगतैर्हलमेतेषां क्रमात्फलोपनयः।
यज्वा शकटाजीवी दूतश्चिरसौख्यभाक्कृषिकृत् ॥ ४ ॥

सं०—द्विरनन्तरकेन्द्रस्थैः=केन्द्रद्वयान्तरस्थैर्ग्रहैः, गदायोगो भवति। स लग्नचतुर्थं, चतुर्थसप्तम, सप्तमदशम एवं दशम लग्न क्रमेण चतुर्विधाः। विलग्नास्तसंस्थितैः=लग्नसप्तमस्थैर्ग्रहैः, शकटम=शकटाख्ययोगः, खचतुर्थयोः=दशमचतुर्थयोः, यदा ग्रहाः भवन्ति तदा, विहङ्गः=विहङ्ग योगः, उदयसुतनवगैः=लग्नपञ्चमनवमस्थैर्ग्रहैः, शृङ्गाटकं=शृङ्गाटक योगः, शृङ्गाटकतः=शृङ्गाटक योगतः, अन्यगतैः=अन्यस्थानस्थैर्ग्रहैः, हलम्=हलसंज्ञक योगः, भवति। एतेषां=गदादियोगानां, क्रमात्=क्रमेण, जातकः यज्वा=यज्ञकर्ता, शकटाजीवि=शकटेन आजीविकः, तद्=दूतकार्यकृत्, चिरसौख्यभाक्=चिरसुखी, कृषिकृत्=कृषकः, भवतीति फलोपनयः=फलादेशः॥ ३-४॥

हि०—लग्न से १।४।७।१० ये स्थान केन्द्र संज्ञक हैं। इनमें समीपस्थ दो केन्द्र स्थान में सभी ग्रह होने से गदा योग होता है। यह चार तरह का होगा जैसे लग्न और चतुर्थ में सभी ग्रह होने से १, चतुर्थ-सप्तम में होने से २, सप्तम-दशम में होने से ३, और दशम लग्न में होने से ४।

लग्न और सप्तम में सभी ग्रह होने से शकट योग, दशम और चतुर्थ में सभी ग्रह पड़ जाँय तो विहङ्ग योग, लग्न, पञ्चम और नवम में सभी ग्रह हों तो शृङ्गाटक योग और १।५।९ से भिन्न स्थानों में परस्पर त्रिकोणस्थ ग्रहवश हलयोग होता है। हल योग त्रिविध है जैसे लग्न से २।६।१० में सभी ग्रह हों तो १।३।७।११ में ग्रह हों तो २ और ४।८।१२ में ग्रह हों तो ३। गदा योग में उत्पन्न जातक यज्ञकर्ता, शकट योग में गाड़ी से जीविका करने वाला, विहङ्ग योग में दूतकार्य करने वाला, शृङ्गाटक योग में चिरसुखी और हलयोग में कृषक होता है॥ ३-४॥

वज्रादि योगाः—

क्रूरैः सुखकर्मस्थैः सौम्यैरुदयास्तसंस्थिर्वज्रम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

यव इति तद्विपरीतैर्मिश्रैः कमलं च्युतैर्वापी ॥ ५ ॥
लग्नादिकण्टकेभ्यश्चतुर्गृहावस्थितैर्ग्रहैर्योगाः ।
यूपेषुशक्तिदण्डा वज्रादीनां फलान्यस्मात् ॥ ६ ॥

सं०—क्रूरैः=पापग्रहैः, सुखकर्मस्थैः=चतुर्थदशमस्थैः, सौम्यैः=शुभग्रहैः, उदयास्तसंस्थितैः=लग्नसप्तमस्थैः, तदा वज्रम्=वज्रयोगः, तद्विपरीतैरर्थात् चतुर्थदशमस्थैः शुभग्रहैः, लग्नसप्तमस्थैः पापग्रहैस्तदा यव=यव संज्ञकः योगः, मिश्रैः=शुभपापैः, केन्द्रस्थैस्तदा कमलं=कमल योगः, च्युतैः=केन्द्रस्था रहितैः ग्रहैः वापी योगोभवतीति । लग्नादिकण्टकेभ्यः=लग्नादिकेन्द्रेभ्यः, चतुर्ग्रहावस्थितैः=चतुःस्थानस्थितैर्ग्रहैः, क्रमेण यूपेषुशक्तिदण्डाश्चत्वारो योगाः भवन्ति, यथा लग्नाच्चतुर्थपर्यन्तं सर्वे ग्रहाः स्तिास्तदा यूपः, चतुर्थात्सप्तमपर्यन्तं यदि ग्रहास्तदा इषुयोगः,सप्तमाद्दशमपर्यन्तं सर्वे ग्रहास्तदा शक्ति योगः,दशमाल्लग्नावधि यदि सर्वे ग्रहास्तदा दण्ड योगः। अग्रे वज्रादीनां योगानां फलानि कथयन्ति आचार्याः ॥ ५-६ ॥

हि०—लग्न से ४।१० में सभी पाप ग्रह हों और १।७ में सभी शुभ ग्रह हों तो वज्र योग होता है। इसके विपरीत अर्थात् ४।१० में शुभ ग्रह और १।७ में पाप ग्रह होने से यव योग, १।४।७।१० में सभी पाप और शुभ ग्रह हों तो कमलयोग और केन्द्र (१।४।७।१०) में ग्रह नहीं रहने पर वापीयोग होता है। यह वापीयोग स्थान वश द्विविध होता है जैसे लग्न से २।५।८।११ में सभी ग्रह के रहने पर प्रथम और ३।६।९।१२ में सभी ग्रह होने से द्वितीय वापीयोग होगा।

